| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| एकाक्षरा वृत्तिः । उक्था । | | |
| श्रीः | ग् श्री ऽ | श्रीस्ते । सास्ताम् ॥ |
| द्व्यक्षरा वृत्तिः । अत्युक्था । | | |
| स्त्री | गौ स्त्री ऽ,ऽ | गोपस्त्रीभिः । कृष्णो रेमे ॥ |
| त्र्यक्षरा वृत्तिः । मध्या । | | |
| नारी | मो नारी ऽऽऽ | गोपानां नारीभिः । श्लिष्टोऽव्यात् कृष्णो वः ॥ |
| मृगी | रो मृगी ऽ।ऽ | सा मृगीलोचना । राधिका श्रीपतेः ॥ |
| चतुरक्षरा वृत्तिः । प्रतिष्ठा । | | |
| कन्या | ग्मौ चेत् कन्या ऽ,ऽऽऽ | भास्वत्कन्या सैका धन्या । यस्याः कूले कृष्णोऽखेलत् ॥ |
| सती | नगि सती ।।।,ऽ | सुररिपो ! तव पदम् । नमति सा ननु सती ॥ |
| पञ्चाक्षरा वृत्तिः । सुप्रतिष्ठा । | | |
| पङ्क्तिः | भ्गौ गिति पङ्क्तिः ऽ।।,ऽ,ऽ | कृष्णसनाथा तर्णकपङ्क्तिः । यामुनकच्छे चारु चचार ॥ |
| प्रिया | सलगैः प्रिया ।।ऽ,।,ऽ | व्रजसुभ्रुवो विलसत्कलाः । अभवन् प्रिया सुरवैरिणः ॥ |
| षडक्षरा वृत्तिः । गायत्री । | | |
| तनुमध्या | त्यौ चेत् तनुमध्या ऽऽ।,।ऽऽ | मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा ।<br>आस्तां मम चित्ते नित्यं तनुमध्या ॥ |
| शशिवदना | शशिवदना न्यौ ।।।,।ऽऽ | शशिवदनानां व्रजतरुणीनाम् ।<br>अधरसुधोर्म्मिं मधुरिपुरैच्छत् ॥ |
| सोमराजी | द्विया सोमराजी ।ऽऽ,।ऽऽ | हरे ! सोमराजीसमा ते यशःश्रीः ।<br>जगन्मण्डलस्य च्छिनत्त्वन्धकारम् ॥ |
| विद्युल्लेखा | विद्युल्लेखा मो मः ऽऽऽ, ऽऽऽ | |
| वसुमती | त्सौ चेद् वसुमती ऽऽ।,।।ऽ | |
| सप्ताक्षरा वृत्तिः । उष्णिक् । | | |
| मधुमती | ननगि मधुमती ।।।,।।।,ऽ | रविदुहितृतटे नवकुसुमततिः ।<br>व्यधित मधुमती मधुमथनमुदम् ॥ |
| कुमारललिता | कुमारललिता ज्सगाः ।ऽ।,।।ऽ,ऽ | सुरारितनुवल्ली कुमारललिता सा ।<br>व्रजैणनयनानां ततान मुदमुच्चैः ॥ |
| मदलेखा | मसृगौ स्यात् मदलेखा ऽऽऽ,।।ऽ,ऽ | रङ्गे बाहुविलग्नाद् दन्तीन्द्रान्मदलेखा ।<br>लग्नाभून्मुरशत्रौ कस्तूरीरसचर्च्चा ॥ |
| हंसमाला | सरगैर्हंसमाला ।।ऽ,ऽ।ऽ,ऽ | |
| अष्टाक्षरा वृत्तिः । अनुष्टुप् । | | |
| चित्रपदा | चित्रपदा यदि भौ गौ ऽ।।,ऽ।।,ऽ,ऽ | यामुनसैकतदेशे गोपवधूजलकेलौ ।<br>कंसरिपोर्गतिलीला चित्रपदा जगदव्यात् ॥ |
| माणवकम्<br>माणवकक्रीडमिति केचित् । | भात्तलगा माणवकम् ऽ।।,ऽऽ।,।,ऽ | चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम् ।<br>ध्याय सखे स्मेरमुखं नन्दसुतं माणवकम् ॥ |
| विद्युन्माला | मो मो गो गो विद्युन्माला ऽऽऽ,ऽऽऽ,ऽ,ऽ | वासो वल्लीविद्युन्माला बर्हश्रेणी शक्रश्चापः ।<br>यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः ॥ |
| समानिका | ग्लौ रजौ समानिका तु ऽ,।,ऽ।ऽ,।ऽ। | यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म ।<br>धीः समानिका परेण नोचिताऽत्र मत्सरेण ॥ |
| प्रमाणिका<br>नगस्वरूपिणी इति कुत्रापि । | प्रमाणिका जरौ लगौ ।ऽ।,ऽ।ऽ,।,ऽ | पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः ।<br>श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥ |
| गजगतिः | नभलगा गजगतिः ।।।,ऽ।।,।,ऽ | रविसुतापरिसरे विहरतो दृशि हरेः ।<br>व्रजवधूगजगतिर्मुदमलं व्यतनुत ॥ |
| हंसरुतम् | म्नौ गौ हंसरुतमेतत् ऽऽऽ,।।।,ऽ,ऽ | |
| नाराचिका | नाराचिका तरौ लगौ ऽऽ।,ऽ।ऽ,।,ऽ | |
| नवाक्षरा वृत्तिः । बृहती । | | |
| भुजगशिशुभृता<br>भृतेत्यत्र सृतेति युतेति च केचित् । | भुजगशिशुभृता नौ मः ।।।,।।।,ऽऽऽ | हृदतटनिकटक्षोणौ भुजगशिशुभृता यासीत् ।<br>सुररिपुदलिते नागे व्रजजनसुखदा साभूत् ॥ |